# सुन्दरकाण्ड सप्तचत्वारिंशः सर्गः (४७) -॥ अक्षकुमारवधः ॥

सेनापतीन् पञ्च स तु प्रमापितान्
हनूमता सानुचरान् सवाहनान् ।
समीक्ष्य राजा समरोद्धतोन् मुखं
कुमारमक्षं प्रसमैक्ष ताग्रतः ॥ १ ॥

स तस्य दृष्ट्यर्पण सम्प्रचोदितः
प्रतापवान् काञ्चन चित्र कार्मुकः ।
समुत् पपाताथ सदस् युदीरितो
द्विजाति मुख्यैर् हविषेव पावकः ॥ २ ॥

ततो महद् बाल दिवाकर प्रभं
प्रतप्त जाम्बूनद जाल सन्ततम् ।
रथं समास्थाय ययौ स वीर्यवान्
महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥

ततस्तपः सङ्ग्रह सञ्चयार्जितं
प्रतप्त जाम्बूनद जाल शोभितम् ।
पताकिनं रत्न विभूषित ध्वजं
मनोज वाष्टाश्व वरैः सुयोजितम् ॥ ४ ॥

सुरासुरा धृष्य मसङ्ग चारिणं
रवि प्रभं व्योम चरं समाहितम् ।
सतूणमष्टासि निबद्ध बन्धुरं
यथा क्रमा वेशित शक्ति तोमरम् ॥ ५ ॥

विराजमानं प्रति पूर्ण वस्तुना
सहेम दाम्ना शशि सूर्य वर्चसा ।
दिवाकराभं रथ मास्थितस् ततः
स निर्जगामामर तुल्य विक्रमः ॥ ६ ॥

स पूरयन् खं च महीं च साचलां
तुरङ्ग मातङ्ग महारथ स्वनैः ।
बलैः समेतैः स हि तोरण स्थितं
समर्थ मासीन मुपागमत् कपिम् ॥ ७ ॥

स तं समासाद्य हरिं हरीक्षणो
युगान्त कालाग्नि मिव प्रजाक्षये ।
अवस्थितं विस्मित जात सम्भ्रमः
समैक्षताक्षो बहुमान चक्षुषा ॥ ८ ॥

स तस्य वेगं च कपेर् महात्मनः
पराक्रमं चारिषु पार्थि वात्मजः ।
विचारयन् स्वं च बलं महाबलो
हिमक्षये सूर्य इवाभि वर्धते ॥ ९ ॥

स जातमन्युः प्रसमीक्ष्य विक्रमं
स्थिरं स्थितः सम्यति दुर्निवारणम् ।
समाहितात्मा हनुमन्त माहवे
प्रचोदयामास शरैस्त्रिभिः शितैः ॥ १० ॥

ततः कपिं तं प्रसमीक्ष्य गर्वितं
जित श्रमं शत्रु पराज योर्जितम् ।

अवैक्षताक्षः समुदीर्ण मानसः
स बाण पाणिः प्रगृहीत कार्मुकः ॥ ११ ॥

स हेम निष्काङ्गद चारु कुण्डलः
समाससा दाशु पराक्रमः कपिम् ।
तयोर् भूवा बप्रतिमः समागमः
सुरासुराणामपि सम्भ्रम प्रदः ॥ १२ ॥

ररास भूमिर्न तताप भानुमान्
ववौ न वायुः प्रचचाल चाचलः ।
कपेः कुमारस्य च वीक्ष्य सम्युगं
ननाद च द्यौ रुदधिश्च चुक्षुभे ॥ १३ ॥

ततः स वीरः सुमुखान् पतत्रिणः
सुवर्ण पुङ्खान् सविषा निवोरगान् ।
समाधि सम्योग विमोक्ष तत्त्ववित्
शरानथ त्रीन् कपि मूर्ध्र्य पातयत् ॥ १४ ॥

स तैः शरै र्मूर्ध्नि समं निपातितैः
क्षरन् नसृग् दिग्ध विवृत्त लोचनः ।
नवोदि तादित्य निभः शरांशुमान्
व्यरोच तादित्य इवांशु मालिकः ॥ १५ ॥

ततः स पिङ्गाधिप मन्त्रि सत्तमः
समीक्ष्य तं राज वरात्मजं रणे ।
उदग्र चित्रायुध चित्र कार्मुकं
जहर्ष चापूर्यत चाह वोन् मुखः ॥ १६ ॥

स मन्दरा ग्रस्थ इवांशु मालिको
विवृद्ध कोपो बलवीर्य सम्युतः ।
कुमारमक्षं सबलं सवाहनं
ददाह नेत्राग्नि मरीचिभिस् तदा ॥ १७ ॥

ततः स बाणासन चित्र कार्मुकः
शर प्रवर्षो युधि राक्षसाम्बुदः ।
शरान् मुमोचाशु हरीश्वराचले
बलाहको वृष्टि मिवाचलोत्तमे ॥ १८ ॥

ततः कपिस्तं रणचण्ड विक्रमं
विवृद्ध तेजो बलवीर्य सम्युतम् ।
कुमारमक्षं प्रसमीक्ष्य सम्युगे
ननाद हर्षाद् घन तुल्य विक्रमः ॥ १९ ॥

स बाल भावाद् युधि वीर्यदर्पितः
प्रवृद्ध मन्युः क्षत जोपमेक्षणः ।
समास सादा प्रतिमं कपिं रणे
गजो महाकूप मिवावृतं तृणैः ॥ २० ॥

स तेन बाणैः प्रसभं निपातितैः
चकार नादं घन नाद निःस्वनः ।
समुत् पपाताशु नभः स मारुतिः
भुजोरु विक्षेपण घोर दर्शनः ॥ २१ ॥

समुत्पतन्तं समभिद्रवद् बली
स राक्षसानां प्रवरः प्रतापवान् ।

रथी रथि श्रेष्ठतमः किरन् शरैः
पयोधरः शैल मिवाश्म वृष्टिभिः ॥ २२ ॥

स तान् शरांस्तस्य हरिर् विमोक्षयन्
चचार वीरः पथि वायु सेविते ।
शरान्तरे मारुतवद् विनिष्पतन्
मनोजवः सम्यति चण्ड विक्रमः ॥ २३ ॥

तमात्त बाणासन माहवोन् मुखं
खमास् तृणन्तं विशिखैः शरोत्तमैः ।
अवैक्षताक्षं बहुमान चक्षुषा
जगाम चिन्तां च स मारुतात्मजः ॥ २४ ॥

ततः शरैर् भिन्न भुजान्तरः कपिः
कुमार वीर्येण महात्मना नदन् ।
महाभुजः कर्म विशेष तत्त्वविद्
विचिन्तयामास रणे पराक्रमम् ॥ २५ ॥

अबालवद् बाल दिवाकर प्रभः
करोत्ययं कर्म महन् महाबलः ।
न चास्य सर्वाहव कर्म शोभिनः
प्रमापणे मे मतिरत्र जायते ॥ २६ ॥

अयं महात्मा च महांश्च वीर्यतः
समाहितश् चाति सहश्च सम्युगे ।
असंशयं कर्मगुणोदयादयं
सनाग यक्षैर् मुनिभिश्च पूजितः ॥ २७ ॥

पराक्र मोत्साह विवृद्ध मानसः
समीक्षते मां प्रमुखागतः स्थितः ।
पराक्रमो ह्यस्य मनांसि कम्पयेत्
सुरा सुराणा मपि शीघ्र गामिनः ॥ २८ ॥

न खल्वयं नाभि भवे दुपेक्षितः
पराक्रमो ह्यस्य रणे विवर्धते ।
प्रमापणं त्वेव ममास्य रोचते
न वर्धमानोऽग्नि रुपेक्षितुं क्षमः ॥ २९ ॥

इति प्रवेगं तु परस्य तर्कयन्
स्वकर्म योगं च विधाय वीर्यवान् ।
चकार वेगं तु महाबलस् तदा
मतिं च चक्रेऽस्य वधे महाकपिः ॥ ३० ॥

स तस्य तानष्ट हयान् महाजवान्
समाहितान् भार सहान् विवर्तने ।
जघान वीरः पथि वायु सेविते
तल प्रहारैः पवनात्मजः कपिः ॥ ३१ ॥

ततस् तलेनाभि हतो महारथः
स तस्य पिङ्गाधिप मन्त्रि निर्जितः ।
प्रभग्न नीडः परिमुक्त कूबरः
पपात भूमौ हत वाजिरम्बरात् ॥ ३२ ॥

स तं परित्यज्य महारथो रथं
सकार्मुकः खड्गधरः खमुत्पतन् ।

तपोभि योगाद् रुषिरुग्र वीर्यवान्
विहाय देहं मरुता मिवालयम् ॥ ३३ ॥

ततः कपिस्तं विचरन्त मम्बरे
पतत्रि राजा निल सिद्ध सेविते ।
समेत्य तं मारुत तुल्य विक्रमः
क्रमेण जग्राह स पादयो र्द्ढम् ॥ ३४ ॥

स तं समाविध्य सहस्रशः कपिः
महोरगं गृह्य इवाण्डजेश्वरः ।
मुमोच वेगात् पितृ तुल्य विक्रमो
महीतले सम्यति वानरोत्तमः ॥ ३५ ॥

स भग्न बाहूरु कटी शिरोधरः
क्षरन् नसृङ् निर्मथितास्थि लोचनः ।
स भग्न सन्धिः प्रविकीर्ण बन्धनो
हतः क्षितौ वायु सुतेन राक्षसः ।
महाकपिर् भूमि तले निपीड्य तं
चकार रक्षोधिपतेर् महद् भयम् ॥ ३६ ॥

महर्षिभिश् चक्र चरैर् महाव्रतैः
समेत्य भूतैश्च सयक्ष पन्नगैः ।
सुरैश्च सेन्द्रैर् भृशजात विस्मयैः
हते कुमारे स कपिर् निरीक्षितः ॥ ३७ ॥

निहत्य तं वज्रि सुतोपमं रणे
कुमारमक्षं क्षतजोप मेक्षणम् ।

तदेव वीरोऽभि जगाम तोरणं
कृतक्षणः काल इव प्रजाक्षये ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥